# मम पुस्तकम्

नाम – ____________________

पत्रसङ्केतः – ____________________

____________________

चल-दूरवाणी-सङ्ख्या – ____________________


शासकीय-चिकित्सा-केन्द्रम्
मुरारि-जनपदः
विनोद-पादुका-आपणः
रीता-सौन्दर्यम्
७
३
४

## वार्तालापाय

१. एतत् चित्रं कुत्रत्यम् अस्ति ? २. जनाः किं किं कुर्वन्ति ? ३. भवतः/भवत्याः खाद्यान्नस्य आपणे किं किं प्राप्यते ? ४. अस्मिन् चित्रे कति बालाः सन्ति ? ५. अस्मिन् चित्रे (४) इति संख्या कुत्र लिखिता अस्ति ? ६. चित्रे कति खट्वाः सन्ति? ७. अस्मिन् चित्रे बालाः किं किं कुर्वन्ति ? ८. अस्मिन् चित्रे कति बालाः पठन्ति ?



# १ परिवारः प्रतिवेशः च

**वयं ज्ञास्यामः**

| अ | आ | न | प | स | र | व |
|---|---|---|---|---|---|---|

- १ तः २० पर्यन्तं सङ्ख्या-परिचयम् ।
- पठनं लेखनं च ।

## वयं चित्रं दृष्ट्वा पठामः -




आपणः



परिवारः



द्वारम्



पाकशाला

## ▪ पठन्तु लिखन्तु च -

अ



अग्निः

आ



आपणः

अ आ

न



नखः

ना



नारिकेलम्

न ना

**शिक्षक-निर्देशः** — सहभागिनः क्रमशः सर्वेषां चित्राणां परिचयं कारयन्तु। चित्राणाम् अधः लिखितानां शब्दानाम् अधः अङ्गुलीं संस्थाप्य उच्चारणं लेखनं च कारयन्तु। 'अ' एवञ्च 'आ' इत्यनयोः ध्वनेः आकृतेः च भेदम् अपि बोधयन्तु। इत्थमेव अन्येषाम् अपि अक्षराणाम् उच्चारणं लेखनं च कारयन्तु।

प



पत्रवाहकः

पा



पाचकः

प

पा

स

७

सप्त

सा



साधुः

स

सा

र



रज्जुः

रा



रात्रिः

र रा

व



वनम्

वा



वातायनम्

व वा

## ■ पश्यामः, पठामः लिखामः च –

'अ' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

अग्निः नदी वायुः आकाशः

'आ' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

रज्जुः नासिका आम्रम् मार्जनी

'व' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

पाचकः द्वारम् परिवारः वनम्

'वा' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

मार्गः सप्त आसन्दः वातायनम्

'न' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

आपणः गृहम् नदी पत्रवाहकः

'ना' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

वाद्ययन्त्रम् वृक्षः नखः नारिकेलम्

'र' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

नलिका रसः जनः पाकशाला

'स' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

समुद्रः आचार्यः दूरवाणी पात्रम्

'प' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

चषकः पर्णम् पुस्तकम् लेखनी

## ■ चित्रं दृष्ट्वा रिक्तस्थाने उचितं वर्णं पूरयामः -

१. सा······सः 

२. वान···· 

३. ···रिकेलम् 

४. व····म् 

५. ······म्रम् 

६. ····लिका 

**शिक्षक-निर्देशः** — सहभागिभिः सह मिलित्वा गीते विद्यमानानाम् अक्षराणां शब्दानां च परिचयं कारयन्तु। अक्षराणां शब्दानां च लेखने सहभागिनां सहयोगं कुर्वन्तु। मिलित्वा गीतं गायन्तु।

## ▪ गणनां कृत्वा संख्यायाः परिचयं कुर्वन्तु -



१

**एकं** पुष्पम्



२

**द्वे** पुस्तके



३

**त्रीणि** कन्दुकानि



४

**चत्वारि** आम्राणि



५

**पञ्च** गृहाणि



६

**षड्** आसन्दाः



७

**सप्त** घटाः



८

**अष्ट** नलिकाः



९

**नव** दाडिमानि

**शिक्षक-निर्देशः** — प्रयत्नः कर्तव्यः यत् सहभागिनः चित्रेषु प्रदर्शितानां वस्तूनां गणनां कृत्वा प्रदर्शितानां संख्यानां परिचयं प्राप्नुयुः। सहभागिनां कृते तेषां समीपस्थानां वस्तूनां गणनां कर्तुम् अवसरं प्रयच्छन्तु, यथा- प्रकोष्ठे कति जनाः सन्ति ?

## ▪ संख्यां वदामः लिखामः च –

| | | | | | |
|---|---|---|---|---|---|
| १ | १ | | ६ | ६ | |
| २ | २ | | ७ | ७ | |
| ३ | ३ | | ८ | ८ | |
| ४ | ४ | | ९ | ९ | |
| ५ | ५ | | ० | 0 | |

## ▪ चलदूरवाण्यां का संख्या कुत्र अस्ति ? रिक्तस्थानेषु लिखामः -



.............. एकम्

.............. द्वे

.............. त्रीणि

.............. चत्वारि

.............. पञ्च

षड् ..............

सप्त ..............

अष्ट ..............

नव ..............

शून्यम् ..............

**शिक्षक-निर्देशः**— दूरवाण्यां प्रदत्तानाम् अङ्कानां लेखनस्य अभ्यासं कारयन्तु। प्रयत्नं कुर्वन्तु यत् सहभागिनः आदौ एतेषाम् अङ्कानां लेखनं बिन्दुयुक्तानां रेखाणां सहयोगेन कुर्युः अनन्तरं स्वयमेव लिखेयुः वदेयुः च। येषां सहभागिनां कृते अभ्यासस्य अधिका आवश्यकता अस्ति, तेभ्यः पुनः पुनः अभ्यासस्य अवसरः दातव्यः। अयमपि यत्नः करणीयः यत् सहभागिनः चलदूरवाण्यां टङ्कितान् अङ्कान् ज्ञात्वा पुनः १ तः ९ पर्यन्तं संख्याः लिखन्तु।

## ■ गोविन्दः सपरिवारं शकटेन गच्छति । पश्यन्तु गणयन्तु लिखन्तु च –



| | |
|---|---|
| ■ शकटे कति जनाः सन्ति ? | |
| ■ शकटे कति पुरुषाः सन्ति ? | |
| ■ शकटे कति महिलाः सन्ति ? | |
| ■ चित्रे कति पुष्पाणि सन्ति ? | |
| ■ शकटे कति चक्राणि सन्ति ? | |
| ■ शकटे कति तैलदीपाः सन्ति ? | |

## ■ रिक्तस्थाने संख्यां लिखित्वा क्रमं पूरयन्तु ।

| ० | | २ | | | ५ | | | ८ |
|---|---|---|---|---|---|---|---|---|

**शिक्षक-निर्देशः** — सहभागिभिः वस्तूनां गणनां कारयित्वा संख्या-लेखनस्य अभ्यासं कारयन्तु । संख्यायाः पठने लेखने च सहभागिनां सहयोगं कुर्वन्तु । यदि भवन्तः इच्छन्ति तर्हि पार्श्वे विद्यमानानां वस्तूनां गणनाम् अपि कारयितुं शक्नुवन्ति ।

## ▪ आयान्तु, मिलित्वा गणनां कुर्मः -



**दश** नलिकाः — १०



**एकादश** खट्वाः — ११



**द्वादश** पत्राणि — १२



**त्रयोदश** कपाटिकाः — १३



**चतुर्दश** पक्षिणः — १४



**पञ्चदश** रक्षासूत्राणि — १५



**षोडश** नारिकेलानि — १६



**सप्तदश** दाडिमानि — १७



**अष्टादश** मीनाः — १८



**नवदश** मौक्तिकानि — १९



**विंशतिः** अग्निशलाकाः — २०

## रिक्तस्थाने सङ्ख्यां लिखित्वा क्रमं पूरयन्तु -

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| १० | | १२ | | १४ | १५ | | १७ | | | २० |

**शिक्षक-निर्देशः** — सहभागिभिः वस्तूनां गणनां कारयित्वा संख्या-लेखनस्य अभ्यासं कारयन्तु। संख्यायाः पठने लेखने च सहभागिनां सहयोगं कुर्वन्तु। यदि भवन्तः इच्छन्ति तर्हि पार्श्वे विद्यमानानां वस्तूनां गणनाम् अपि कारयितुं शक्नुवन्ति।

## अभ्यास-कार्यम्

### १. प्रदत्तानाम् अक्षराणां सञ्ज्ञानं कृत्वा गोलाकारं कुर्मः ।

| | | | |
|---|---|---|---|
| अ | – | अश्वः | अग्निः |
| न | – | नदी | वातायनम् |
| प | – | पर्णम् | पत्रालयः |
| स | – | आसन्दः | सप्त |

### २. पठामः लिखामः च -

प स अ र ना

### ३. चित्रं दृष्ट्वा रिक्तस्थानं पूरयामः -



श........कः



........करः



नय........म्

### ४. गणनां कृत्वा सङ्ख्यां लिखामः -

| | |
|---|---|
|  | |
|  | |
|  | |

## ५. रिक्तस्थाने सङ्ख्यां लिखित्वा क्रमं पूरयामः -

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| १ | | ३ | ४ | | | | | ९ |

## ६. गणनां कृत्वा सङ्ख्यां लिखामः

| | | | |
|---|---|---|---|
|  | |  | |
|  | |  | |

## ७. रिक्तस्थाने सङ्ख्यां लिखित्वा क्रमं पूरयामः -

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| १० | | १२ | | १४ | १५ | | १७ | | | २० |

## ▪ मम शब्दाः